# Shri Purnavirathidevacharyanirmitam Shrivaishnavamangalam

# શ્રીપૂર્ણવિરાઠીદેવાચાર્યનિર્મિતં શ્રીવૈષ્ણવમઙ્ગલં

## Document Information

Text title : Shri Purnavirathidevacharyanirmitam Shrivaishnavamangalam

File name : vaiShNavamangalaMpUrNavirAThIdevAchArya.itx

Category : raama, rAmAnanda, mangala, aShTaka, vishhnu, vishnu

Location : doc_raama

Author : pUrNavirAThIdevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીપૂર્ણવિરાઠીદેવાચાર્યનિર્મિતં શ્રીવૈષ્ણવમઙ્ગલં

આનન્દભાષ્યકર્ત્તારં રામાનન્દં ચ રાઘવમ્ ।
કુર્વે ગુરું ચ નત્ત્વાહં શ્રીમદ્વૈષ્ણવમઙ્ગલમ્ ॥ ૧॥

સંસ્કારપઞ્ચકાપન્ના યે ચેશાનીશબોધકાઃ ।
તેભ્યઃ શ્રીરામભક્તેભ્યો વૈષ્ણવેભ્યોઽસ્તુ મઙ્ગલમ્ ॥ ૨॥

સાત્વિકા દ્રોહશૂન્યા યે પ્રશાન્તચેતસસ્તથા ।
તેભ્યઃ શ્રીરામભક્તેભ્યો વૈષ્ણવેભ્યોઽસ્તુ મઙ્ગલમ્ ॥ ૩॥

પરોપકારકર્ત્તારઃ સૌમ્યાશ્ચ યે જિતેન્દ્રિયાઃ ।
તેભ્યઃ શ્રીરામભક્તેભ્યો વૈષ્ણવેભ્યોઽસ્તુ મઙ્ગલમ્ ॥ ૪॥

યે સાધુગુરુભક્તાશ્ચ સદાચારપરાયણાઃ ।
તેભ્યઃ શ્રીરામભક્તેભ્યો વૈષ્ણવેભ્યોઽસ્તુ મઙ્ગલમ્ ॥ ૫॥

શ્રીરામપૂજકા યે ચ યજ્ઞદાનતપઃપરા ।
તેભ્યઃ શ્રીરામભક્તેભ્યો વૈષ્ણવેભ્યોઽસ્તુ મઙ્ગલમ્ ॥ ૬॥

પતિતપાવના યે ચ રામકીર્ત્તનતત્પરાઃ ।
તેભ્યઃ શ્રીરામભક્તેભ્યો વૈષ્ણવેભ્યોઽસ્તુ મઙ્ગલમ્ ॥ ૭॥

દ્વારપીઠાધિપશ્રીમત્પૂર્ણવિરાઠિનિર્મિતમ્ ।
મઙ્ગલં ભવતાદેતત્ સર્વેષાં મઙ્ગલપ્રદમ્ ॥ ૮॥

ઇતિ શ્રીપૂર્ણવિરાઠીદેવાચાર્યનિર્મિતં શ્રીવૈષ્ણવમઙ્ગલં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*